# Shri Navadurga Vandanam Prayer to Goddess Sri NavaDurga

# श्रीनवदुर्गावन्दनम्

## Document Information

Text title : Navadurga Vandanam

File name : navadurgAvandanam.itx

Category : devii, durgA, nava, hkmeher

Location : doc_devii

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Stavarchana-Stavakam (Sanskrit Stotra-Kavya)

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : October 16, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 16, 2023

*sanskritdocuments.org*

Shri Navadurga Vandanam Prayer to Goddess Sri NavaDurga

# श्रीनवदुर्गावन्दनम्

जगद्-वन्द्या नवदुर्गा देव्यः सुदिव्य-मातरः ।
आद्यं नुमः शैलपुत्रीं द्वितीयं ब्रह्मचारिणीम् ॥ १॥

चन्द्रघण्टां तृतीयं च कुष्माण्डां चतुर्थं तथा ।
पञ्चमं स्कन्दमातरं षष्ठं कात्यायनीं नुमः ॥ २॥

कालरात्रिं सप्तमं च महागौरीं नुमोऽष्टमम् ।
नवमं सिद्धिदात्रीं च सुभक्त्या प्रणता वयम् ॥ ३॥

प्रयच्छन्तु शुभं देव्यः सम्पदां चानुकम्पया ।
यातु दुर्भावनास्माकं भातु चाध्यात्मिकं बलम् ॥ ४॥

तमो विनश्यतु चित्ते दत्त मोदं हे मातरः !
युष्माकं चरणाम्बुजे सप्रणामं भजामहे ॥ ५॥

आदिशक्ते ! भक्तप्रिये ! देवि दुर्गे ! नमो नमः ।
एकमेव स्वरूपं ते नवधा परिकीर्त्तितम् ॥ ६॥

शम्भोरर्द्धाङ्गिनी त्वं वै मङ्गला सिद्धिदायिनी ।
प्रसादैस्ते श्रीसमृद्धिः सुखं शान्तिः प्रवर्द्धताम् ॥ ७॥

क्षमस्व नः सर्वदोषं दुष्टदैत्य-निपातिनि !
तव स्नेह-दृष्टिपातः कष्टं हरतु सर्वदा ॥ ८॥

यातु नाशं पापताप-दुःखशोक-रुजादिकम् ।
महायुधे ! महामाये ! स्वस्तिं देहि नमोस्स्तु ते ॥ ९॥

नवदुर्गा-वन्दनेयं महादेव्या मुदावहा ।
कल्याणं तनुतां लोके हरतां कलि-कल्मषम् ॥ १०॥

– रचयिता : हरेकृष्ण-मेहेरः

Copyright Dr.Harekrishna Meher

*Shri Navadurga Vandanam Prayer to Goddess Sri NavaDurga*
pdf was typeset on October 16, 2023

Please send corrections to *sanskrit@cheerful.com*